# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री-1 (SEM-2)** **प्रश्नपत्रम् – 6** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.C.-1.2.4** समयः - 11 तः 02 पर्यन्तम्

दिनाङ्कः –16/04/2019 सन्दर्भग्रन्थः – मनुस्मृतिः (3, 4 अध्यायाः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 अधोलिखितेषु द्वयोः व्याख्यां कुरुत।** **10**

(1) सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः ॥

(2) ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः।
कन्याप्रदानं स्वाच्छान्द्यादासुरो धर्म उच्यते ॥

(3) सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥

**प्रश्नः-2 एकस्य उपरि निबन्धं निबन्धयत।** **10**

(1) कन्यादोषाः लिखन्तु।

(2) विवाहप्रकाराः लिखन्तु।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 अधोलिखितेषु द्वयोः व्याख्यानं कुरुत।** **10**

(1) चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च।
रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान् ॥

(2) सन्तोषं परमास्थाय सुखार्थी संयतो भवेत्।
सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः ॥

(3) नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्।
नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥

**प्रश्नः-4 एकस्य उपरि निबन्धं निबन्धयत।** **10**

(1) स्नातकव्रतानि लिखन्तु।

(2) भार्यया सह भोजनादिनिषेधं लिखन्तु।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 अधोलिखितेषु द्वयोः व्याख्यानं कुरुत।** **10**

(1) अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ।
अनध्यायो रुद्यमानो समवाये जनस्य च ॥

(2) उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम्।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु॥

(3) न स्नानमाचरेद् भुक्त्वा नातुरा न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥

**प्रश्नः-6 एकस्य उपरि निबन्धं निबन्धयत।** **10**

(1) धर्मशास्त्रग्रन्थानां महत्त्वम्।

(2) संतोषस्य प्रशंसा।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-7 दशानां लघुत्तरेण लिखत।** **10**

(1) चतुर्षु आश्रमेषु द्वितीयाश्रमस्य नाम किम्?

(2) तृतीयाध्याये कति श्लोकाः सन्ति?

(3) समावर्तनसंस्कारः कदा भवति?

(4) विवाहस्य कति प्रकाराः सन्ति?

(5) 'दारा' इति शब्दस्य कोऽर्थः?

(6) पञ्चयज्ञानां नामानि लिखत।

(7) स्त्रीधनग्रहणं कर्तव्यं न वा?

(8) ब्राह्मणादिनां किं नावलोकनीयम्?

(9) श्राद्धे भोजनं कर्तव्यं न वा?

(10) दम्पत्तीः शब्दस्य अर्थः कः?

(11) किं नाम तर्पणम्?

(12) 'श्राद्धः' अर्थात् किम्?

(13) एकोद्दिष्टिम् इति किम्?

(14) सुखस्य मूलंकिम्?

(15) मनुस्मृतेः रचयिता कः?